अलङ्कारशास्त्रे नव्यन्यायदर्शनस्य प्रभाव:

Dr. K.V. Vasudevan
Professor(retd), Sreekrishna College, Guruvayur

Abstract

अलङ्कारशास्त्रे सर्वथा अर्थविचार एव प्राधान्यमावहति। न्यायशास्त्रे अपि अर्थविचारः पदार्थ-विचाररूपेण सम्पादितः। नव्यन्यायस्य नव्यत्वं नाम प्रतिपादने वैशिष्ट्यम्। नव्यनैय्यायिकैः अव-लंबिता शास्त्रीया प्रतिपादनरीतिः संस्कृतभाषाप्रयोगकुशलैरपि दुरवगमा वर्तते।रसगङ्गाधरादिषु नव्यव्यायस्य साक्षात्प्रभावः द्रष्टुं शक्यते।विश्वेश्वरपण्डितकृतः अलङ्कारकौस्तुभः नव्यन्यायशैलीं सुतरामाश्लिषति। गोकुलनाथोपाध्यायविरचिता विवरणाख्या काव्यप्रकाशटीका रसमञ्जर्याः वि-श्वेश्वरपण्डितकृता समञ्जसाख्या व्याख्या च नव्यन्यायभाषां बिभर्ति। रसनिरूपणावसरे तत्र गौडानां मैथिलानां च मतोपन्यासः प्रदर्शितः। एवं नव्यनैय्यायिकाः एव पुरस्कृताभिनवभाषाशै-लीप्भावतःसाहित्यशास्त्रस्य प्रधानपदवीसम्पादने प्रचोदनभूता इति प्रसंगोयमुपयुज्यते।

Keywords– नव्यन्यायः, अलङ्कारशास्त्रः, रसगङ्गाधरः, रसमञ्जरीका, काव्यप्रकाशः काव्यामीमांसा

गदाधराद्युक्तिनिकुञ्जमध्ये निलायनक्रीडितमाचरन्तीम् ।
कवीन्द्रवाङ्निर्झरणीषु मन्दं समुत्प्लवन्तीं प्रणतोऽस्मि वाणीम् ।।

इह खलु शब्दार्थशरीरं तावत् काव्यमिति काव्यस्य सामान्यलक्षणमभिदधद्भिः सर्वैरप्यालङ्कारिकैः अर्थस्य प्राधान्यमभ्युपगतम् । शब्दस्य च विचारः प्रायेण पाणिन्यादिप्रणितेषु व्याकरणेषु समुपलभ्यते । अर्थस्य विचा-रस्तु पदार्थविचारात्मकं शास्त्रमिति प्रसिद्धे गौतमोपज्ञे न्यायशास्त्रे दरीदृश्यते । अत एव काणादं न्यायशास्त्रञ्च सर्वशास्त्रोपकारकम् इति प्रथा वरीवर्ति । प्रबन्धेऽस्मिन् अलङ्कारशास्त्रे नव्यन्यायस्य प्रभावः कियानिति स्वल्पेन सन्दर्भेण विचार्यते । न्यायशास्त्रमिदं भगवता गौतमेन सूत्ररूपेण प्रणीतं वात्स्यायनाचार्यस्य भाष्येण समु-पबृंहितमुद्योतकरस्य प्रोज्ज्वलितं वार्तिकैः सनाथीकृतं वाचस्पतिमिश्रस्य तात्पर्यटीका गुणीकृतमुदयनाचार्यस्य टीकापरिशुद्ध्या न परिशोधितं प्रमाणप्रमेयादिषोडशपदार्थनिरूपणात्मकं राराजतीति प्रसिद्धम् । तदेतत् कणा-दोपज्ञेन वैशेषिकदर्शनेन नृसिंहन्यायेन संयुक्तं सत् तर्कशास्त्रमिति पश्चात्तने काले प्रथितं शास्त्रं जनयामासेत्यपि संख्यावतां पुरतो बहु नाख्यातव्यम् । एतत् च न्यायशास्त्रं न्यायमञ्जरीकारो जयन्तभट्टः, न्यायकुसुमाञ्जलि-प्रभृतीनां ग्रन्थानां प्रणेता तत्रभवानुदयनाचार्यः तथान्ये च बहवः पण्डिताः स्वस्वनिबन्धैर्धन्यधन्यं व्यदधुः । तदनन्तरं च क्रिस्तोरनन्तरमेकादशशताब्द्यां वङ्गेषु लब्धजन्मानः महर्षिकल्पाः श्रीमन्तो गङ्गेशोपाध्यायाः स्वकृ-तेन तत्त्वचिन्तामणिनाम्ना प्रबन्धरत्नेन निखिलस्यापि संस्कृतवाङ्मयस्य परिवर्तनं विदधानाः ततो यावदश्रद्धितपूर्वां नूत्नां काञ्चित् चिन्तासरणिमाविश्चक्रे यार्वाचीनेषु शास्त्रेषु गणितविद्यासमकक्षतां भजते । सोऽयं चिन्तामणिः रघुनाथप्रभृतिभिः गदाधर भट्टाचार्यजगदीशतर्कालङ्कारमथुरानाथादिभिः तथान्यैश्च मिथिलाद्र मिलगौडाद्यभिज-नैः विद्वत्तल्लजैः व्याख्यादिभिर्निशातीकृतः समस्तशास्त्राणाम् अभिलषितार्थप्रदाननैपुण्यमावहन् चिन्तामणिरिव विराजते । चिन्तामणिकारात् प्राचीनाः गौतमादयः प्राचीननैयायिका इति ततः पश्चात्कालीना रघुनाथशिरो-मणिप्रभृतयो नव्यनैयायिका इति च व्यवहियते । केचित्तु सूत्रकारादारभ्य कुसुमाञ्जलिकारं यावत् प्राचीनाः, गङ्गेशोपाध्यायादारभ्य दीधितिकारं याव नव्याः, ततोऽर्वाचीनाः सर्वे नव्यनव्या इति त्रेधा विभागमुशन्ति । अन्यैस्त्वतिप्राचीनमिति पक्षान्तरम् अपि स्वीक्रियते । भवत्वेतावान् पक्षभेदः । नात्र तदधिकृत्य विचारयितुं प्रयस्यते । किं वा धर्ममुररीकृत्य गङ्गेशोपाध्यायादयः नव्यत्वेन व्यवहियन्ते इति किञ्चिदवलोकनीयम् । के-चित् अवच्छेदकादिपारिभाषिकपदबाहुल्यं तन्निमित्तं प्राहुः । तदेतत् न युज्यते । कुतः ? स पूर्वेषामपि गुरुः कालेनानवच्छेदात् (योगसूत्रम् १.२६) इति योगसूत्रे ईश्वरीयगुरुत्वे कालानवच्छिन्नत्वस्य प्रदर्शनात् । अपरे प्रमा-णमात्रविचारपरकत्वं तद्धेतुं वदन्ति । तदपि न युज्यते । धर्मकीर्त्यादिप्रणीतेषु प्रमाणवार्तिकप्रभृतिषु ग्रन्थेष्वपि

तादृशव्यवहारापत्तेः । अन्ये तु भाष्यादिषु नास्तिकानां चार्वाकादीनां मतनिरास एव प्राधान्येन क्रियते मणौ तु नास्तिकव्यतिरिक्तानां मीमांसकादीनामपि प्रक्षोच्छेदो निरूप्यते इति तदेव मूलं तदीयनव्यत्वस्येति वदन्ति । तदपि न युक्त्या घटते, पूर्वपक्षनिरास एव शास्त्रकाराणां नैर्भर्यस्य प्रायेण दृश्यमानत्वात् । केषुचित् प्रबन्धेषु अन्यथापि दृश्यमानत्वात् च। तर्हि किं नाम नव्यत्वमिति विचार्यते । प्रतिपादने वैशिष्यमेव नव्यत्वाधायकं तत्त्वम् । तथा हि प्रमाणादिषु षोडशपदार्थेषु प्रमाणविषयिणी चिन्तैव नव्यनैयायिकैः भूयसा समादृता परिदृश्यते ।

तदुक्तं चिन्तामणौ-तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते (तत्त्वचिन्तामणिः, पृ. ११६.) इति । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि (न्यायसूत्रम् १.३.) इति पारमर्षं सूत्रं प्रमाणयन्तः नव्यनैयायिकाः प्रत्यक्षादिपरिच्छेदचतुष्टयात्मके ग्रन्थे न्यायशास्त्रविषयकं समस्तं तत्त्वं विमृश्यते । लक्षणप्रमाणाभ्यां वस्तुसिद्धिः इति सकलशास्त्रसम्मतं वचनमनुसरन्तस्ते बहुविधाभिरद्भुतकल्पनाभिः अव्याप्यतिव्याप्त्यसम्भवादिदोषनिराकरणपूर्वकं शास्त्रोक्तानां लक्षणानां परिष्कारेषु बद्धादरा दरीदृश्यन्ते इत्येतत् तेषां प्राचीननैयायिकेभ्यो महान् भेदो बोध्यः । तदेतत् विद्वत्सभासु शास्त्रार्थविचारावसरे परमतनिरासपूर्वकं स्वमतस्थापनार्थं कीर्त्यभिवृद्ध्यर्थं बुद्धिशुद्ध्यर्थं च नितरामुपयोगीति बहु न वक्तव्यम् । लक्षणादीनां परिष्कारविषये तैर्नव्या काचन रीतिरवलम्ब्यते या तदीयपरिभाषानभिज्ञैः गीर्वाणभाषाप्रयोगकुशलैरपि दुरवबोधा । इदं हि तस्या रीतेर्वैशिष्ट्यं यत् तया रीत्या परिष्कृतं लक्षणं दुर्वादीनां कुचोद्येषु न भज्येत, सुमेधसां सुस्पष्टमर्थावबोधं जनयेत् च । पुरुषार्थानुपयोगित्वात् प्राचीनैरनुक्तान्यपि प्रतियोगितादीनि पदार्थान्तराणि स्पष्टताप्रतिपत्यर्थं तैरङ्गीक्रियन्ते । ते पदार्थाः च द्रव्यादयः सप्त, प्रतियोगिता, अनुयोगिता, अवच्छेदकता, अवच्छेद्यता, निरूपकता, निरूप्यता, आधारता, आधेयता, संसर्गता, विषयता, विषयिता, प्रयोजकता, प्रयोज्यता, कारणता, कार्यता इत्येते पञ्चदश चेति बोध्यम् । शब्दखण्डे विभक्त्यर्थानां विचारः अतिसूक्ष्मशाब्दबोधप्रक्रियादिकं च परामृश्यते। अत एव अनन्तरकालिकानां न्यायव्याकरणमीमांसावेदान्तालङ्कारादिशास्त्राणां सूक्ष्मावबोधसिद्ध्यर्थं नव्यन्यायशास्त्रज्ञानमावश्यकम् । प्रकृते तु अलङ्कारशास्त्रे तदीयः प्रभावः कियानासीदिति किञ्चित् विचार्यते ।

1 नव्यनैयायिकानां काव्यप्रकाशविवरणानि

संस्कृतभाषायामलङ्कारशास्त्रग्रन्थेषु नव्यन्यायस्य भूयान् प्रभावः व्याख्यानेष्वेव भूयसा विलोक्यते । क्वचित् रसगङ्गाधरादिषु साक्षादपि सः प्रभावो द्रष्टुं शक्यते। सरस्वत्यवतारभूतेन मम्मटभट्टेन विरचितः काव्यप्रकाशः गाम्भीर्येण निखिलविषयप्रतिपादनेन च अलङ्कारशास्त्रग्रन्थेषु अन्यादृशो भाभायते । उपत्रिंशतं टीका अस्य ग्रन्थस्य सन्तीति किमु वक्तव्यमस्य ग्रन्थस्य गौरवाधिक्यम् । काव्यप्रकाशस्य कृता गृहे गृहे टीकास्तथाप्येष तथैव दुर्गम इत्युक्तिश्च ग्रन्थस्यास्य माहात्म्यमभिव्यनक्ति । प्राचीने काले वङ्गेषु काव्यप्रकाशटीकाकरणेनैव कश्चित् विद्वान् विद्वत्पदवीमधिरोढुमर्हं आसीदिति काचन प्रथा वर्तते । व्याकरणचरणैः नागेशभटैः, मीमांसकमूर्धन्यैः कमलाकरभट्टैः, वैष्णवमतधुरीणैः विद्याभूषणैः बहुभिर्नव्यन्यायधुरन्धरैश्च काव्यप्रकाशः व्याख्यात इति किमु वक्तव्यमस्य प्राधान्यम् । काव्यप्रकाशटीकाकाराणां नव्यनैयायिकानां मध्ये गदाधर भट्टाचार्यः मुख्यं स्थानमर्हति। मुद्रितापीयं टीका नाधुनोपलभ्यत इति तामधिकृत्य किमपि वक्तुं न शक्यते । जगदीशतर्कालङ्कारश्च काव्यप्रकाशं व्याख्यत्। सोऽयं तर्कालङ्कारः शब्दशक्तिप्रकाशिकाकारः प्रसिद्धस्तर्कालङ्कारो वा न वेत्यत्र मतैक्यं नास्ति प्रेक्षावताम् । पदवाक्यरत्नाकरकारेण गोकुलनाथोपाध्यायेन कृता विवरणाख्या टीका, जयरामन्यायपञ्चाननकृता तिलकापराभिधाना जयरामी, देवनाथतर्कपञ्चाननकृता काव्यकौमुदी च नव्यनैयायिकविरचितासु काव्यप्रकाशव्याख्यासु प्रधानतमा भवन्ति । एतास्वङ्गुलीपरिमिता एव मुद्रिता इति महदिदं विषादस्थानमन्तर्वाणिकुलस्य । यदुनाथमिश्रः व्यञ्जनावाद इति कश्चित् ग्रन्थः व्यरच्यत । सोऽयं बहोः कालात् प्राक् प्रकाशितोऽपि नाधुना समुपलभ्यते । पक्षधर मिश्रापराभिधानः नव्यनैयायिकचूडामणिर्जयदेवः यद्यप्यलङ्कारशास्त्रे चन्द्रालोक इति ग्रन्थतल्लजमरचयत् तथापि स नैयायिकशैलीतः सुतरां विभिन्नया रीत्या निबद्ध इति बोध्यम् । एवं कुवलयानन्दव्याख्यासु तत्सदुपाख्यवैद्यनाथसूरिकृता अलङ्कारचन्द्रिका नव्यन्यायस्य शैलीमनुरुणद्धि । न्यायसिद्धान्तमुक्तावलीकारः विश्वनाथपञ्चाननः अलङ्कारपरिष्काराभिधानं काव्यशास्त्रनिबन्धं न्यबध्नादिति श्रूयते ।[1] इतोऽप्यधिकममुद्रिताः तत्तद्देशेषु पण्डितप्रवरैर्विरचिताः बहवष्टीकाग्रन्था भवेयुरित्येतावन्मात्रमुक्त्वा विषयान्तरं समालोच्यते ।

[1](S. K. De., p. 296.)

2 रसगङ्गाधरः

नव्यन्यायरीत्यनुरोधेन विरचितेषु अलङ्कारग्रन्थेषु अभ्यर्हिततमं स्थानमावहति पण्डितराजेन जगन्नाथेन कृतं रसगङ्गाधराभिधं ग्रन्थरत्नम् । तत्त्वचिन्तामणौ नव्यन्यायसिद्धान्तानिव काव्यशास्त्रीयान् समस्तान् सिद्धान्तान् प्रतिपक्षनिरसनपूर्वकं प्रतिपाद्यालङ्कारान् सर्वान् गलितगर्वान् रचयितुमुद्युक्तः पण्डितराजः केवलमाननद्वयं विरचय्य निजां प्रवृत्तिं मध्ये कथं समापयदिति न विज्ञायते । काव्यलक्षणविचारावसरे पण्डितराजेन 'रमणीयार्थप्रतिपादकः शब्दः' काव्यं काव्यलक्षणमित्थं परिष्कृतम्- इत्थं च चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वम्, यत्प्रतिपादितार्थविषयक भावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वम् । स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारत्ववत्वमेव वा काव्यत्वमिति फलितम् । [2]रसस्वरूपनिरूपणावसरे प्राचामाधुनिकानामपि सिद्धान् परिष्कृत्य रसगङ्गाधरकारेण प्रतिपाद्यते इति महद्वैशिष्ट्यमस्य ग्रन्थस्य । तत्र नव्यास्तु इत्यारभ्य यत् तृतीयं मतमुपन्यस्तं तत् नव्यनैयायिकसम्मतमिति कैश्चित् मन्यते । गोकुलनाथोपाध्यायस्तु विभावादिसंवलितायाः साधारण्येन व्यञ्जनया प्रतीतायाः रतेरनुसन्धानेनाध्यात्मिकं सुखं जायते । तदीयो मानससाक्षात्कारः तु काव्योपनीतरत्याद्यभेदमानन्दे विषयीकरोति दोषविशेषादिति तु न्यायवैशेषिकसौत्रान्तिकमौसरदर्शनसाधारणः पन्थाः [3] इति नैयायिकाभिमतं पक्षं स्पष्टमाचष्ट । द्वितीयाननस्यादौ संलक्ष्यक्रमध्वनेः अभिधादिवृत्तीनां च सुस्पष्टं निरूपणं नव्यन्यायशैलीमनुसरति । अलङ्कारनिरूपणावसरे जगन्नाथस्य नव्यन्यायपाण्डिती इतरस्थलापेक्षया जाज्वल्यमाना समवलोक्यते । तत्र च न्यायशैल्या शाब्दबोधविचारः ग्रन्थान्तरेषु भूयसा नोपलभ्यत इति रसगङ्गाधरस्य महद्वैशिष्ट्यम् । तस्य च स्वरूपप्रदर्शनार्थं दिङ्मात्रमुदाह्रियते अथात्र सादृश्यस्य पदार्थान्तरत्वे बोधो विचार्यते । अरविन्दसुन्दरमित्यत्र अरविन्दनिरूपितसादृश्यप्रयोजकं लक्ष्यते । तच्च सुन्दर पदार्थैकदेशे सौन्दर्येणाभेदसंसर्गेणान्वेति । तेनारविन्दनिरूपितसादृश्यप्रयोजक सौन्दर्यवदभिन्नमिति धीः । निपातातिरिक्तनामार्थयोर्देनान्वयस्याव्युत्पन्नत्वात् अभेदानुसरणम् । एकदेशान्वयस्तु देवदत्तस्य नप्ते्यादाविवात्राप्यभ्युपेयः । समासस्यैव विशिष्टार्थे शक्तिरित्येके । अरविन्दपदमेव लक्षणया सर्वार्थबोधकम्, सुन्दरपदं तु तात्पर्यग्राहकमित्यपरे । [4] इत्यादि । यद्यपि व्युत्पत्तिवादादिषु न्यायग्रन्थेषु प्रसङ्गतः केषाञ्चित् काव्यांशानामपि शाब्दबोधविचारे लक्ष्यते तथापि पूर्णतया पूर्णतया तन्निरूपणं रसगङ्गाधरादिषु ग्रन्थेष्वेवेति विशिष्य वक्तव्यम् ।

3 अलङ्कारकौस्तुभः

अष्टादशशताब्द्यां लब्धजीवितेन विश्वेश्वरपण्डितेन विरचितः अलङ्कारकौस्तुभः रसगङ्गाधरापेक्षया नव्यन्यायशैलीमनुरुणद्धितराम् । उपमादय एकष्टिसंख्याका अलङ्कारा अस्मिन् ग्रन्थे सपरिकरं परिष्कृत्य निरूप्यन्ते । ग्रन्थकृतैव काचन टीकापि विरचिता समुपलभ्यते । तत्रोपमानिरूपणादेको भागोऽत्र समुद्धियते तत्रैकवाक्यवाच्यं सादृश्यं भिन्नयोरुपमा । तत्र निरूपणीयेष्वलङ्कारग्रन्थेष्वित्यर्थः । उपमेयोपमावारणाय एकेति । व्यङ्ग्योपमावारणाय वाच्येति । अनन्वयवारणाय भिन्नेति । फलितार्थस्तु यत्सादृश्यप्रतियोगितायामुपमेयतावच्छेदकावच्छिन्नत्वस्वाश्रय मात्रवृत्तिस्वानवच्छेदकधर्मसामानाधिकरण्योभयाभावः सोपमा । यच्छब्दबोध्यायां सादृश्यप्रतियोगितायामित्यर्थः । चन्द्र इव मुखम् इत्यत्र चन्द्रनिष्ठसादृश्यप्रतियोगितायामुभयाभावसत्वात् लक्षणसमन्वयः स्फुट एव । इत्यादि [5] श्रौत्यादिभेदनिरूपणावसरे चन्द्र इव मुखमित्यत्र शाब्दबोधे तावत् केचिदाहु:- इत्यादिना महता ग्रन्थसन्दर्भेण इवार्थ: विभिन्नस्थलेषु विभिन्नशाब्दबोधप्रकारश्च सविस्तरं विचारितौ । सोऽयमनधीतनव्यन्यायशास्त्रैर्दुरवबोध इत्येतावन्मात्रमत्र प्रतिपाद्यते

4 काव्यप्रकाशविवरणम्

गोकुलनाथोपाध्यायविरचिता विवरणाख्या काव्यप्रकाशटीकास्मिन् सन्दर्भे विशिष्य प्रस्तावमर्हति । व्याख्येयं चतुर्थोल्लासपर्यन्तमेव समुपलभ्यते । विषयप्रतिपादने निष्कर्षातिशयमावहन्तीयं व्याख्या स्वतन्त्रग्रन्थान् अपि अतिशेते। चतुर्थोल्लासे रसास्वादप्रक्रियानिरूपणावसरे विवरणकारेण एकादशक्षणात्मिका आस्वादप्रक्रिया नि-

[2](पु. १८)
[3]काव्यप्रकाशविवरणम्, पु. १३७.
[4]पु. २-८६-९१)
[5](पु. / ५-६.)

रूपिता।[6] तदिदं स्वल्पमात्रेणापि विवरीतुं विस्तरभीतिर्मां नानुमन्यते । जिज्ञासुभिः स एव ग्रन्थोऽनुसन्धीयतामिति केवलं प्रार्थ्यते ।

5 रसमञ्जरीसमञ्जसा

भानुदत्तकृता रसमञ्जरी तावत् सचेतसां समाजे सुप्रसिद्धा यत्र नायिकानां विभागोदाहरणादिकं सलक्षणं निरूपितम् । अस्य ग्रन्थस्य विश्वेश्वरपण्डितकृता समञ्जसाख्या काचन व्याख्या समुपलभ्यते । इयमपि नव्यन्यायशैलीमनुवर्तते इति न न वक्तव्यम्। रसगङ्गाधरादिषु तु श्रव्यकाव्यसम्बद्धानि लक्षणान्येव परिचस्किरे। अस्यां व्याख्यायां तु स्वीयामध्यादिनायिकाभेदानाणं लक्षणं परिष्कृत्य समुपन्यस्तमिति महान् विशेषो विद्यते । उदाहरणार्थं स्वामिन्येवानुरक्ता स्वीयुआ (रसमञ्जरी, पु.) इति स्वीयाख्यनायिकाविभागस्य परिष्कारप्रकारः प्रदर्श्यते - स्वामिन्येवेति । विवाहजन्यसंस्कारविशेषवान् स्वामी । विषयत्वं सप्तम्यर्थः । अनुरागस्य सविषयकत्वात् । एवकारः अन्ययोग्यव्यवच्छेदार्थः । अन्यत्वं स्वामिप्रतियोगित्वम् । योगश्च विषयत्वम् । समभिव्याहाराद् भासते। अनुरागाभावश्च समवायसम्बन्धावच्छिन्नप्रतियोगिताको बोध्यः । तेन सम्बन्धान्तरमादाय नाव्याप्तिः । समवायित्वरूपमाश्रयित्वं क्तप्रत्ययार्थः । तेन भर्तरि नातिव्याप्तिः । तथा च पतिभिन्नविषयकानुरागाभाववत्वे सति पतिविषयकानुरागवत्वं वाक्यार्थः । (पु. १०) समानलज्जामदना मध्या (पु. २७) इति मध्यालक्षणविचारश्च किञ्चित् प्रदर्श्यते । समानौ तुल्यौ लज्जामदनौ यस्याः । तुल्यत्वं च परस्परनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिव्यापारकत्वम् । तथा च लज्जाप्रतिबन्धमदनव्यापारकत्वे सति मदनप्रतिबन्धकिञ्चिल्लज्जाव्यापारकत्वं मध्यात्वमित्यत्र तात्पर्यम्। स्यादेतद्, मुग्धायामतिव्याप्तिः इत्यादि । सपत्नीत्वं च स्वभिन्नत्वे सति स्वभर्तृनिरूपितभार्यात्ववत्वम् (पु. ५७) विरुद्धनिष्ठज्ञानविषयत्वाभावप्रकारकेच्छादिशेष्यत्वमेवाप्रकटत्वम् (पु. ६७) इत्यादीनि समञ्जसोक्तानि लक्षणानि विचारमधुराणि भवन्ति । रसनिरूपणावसरे गौडानां मैथिलानां च मतोपन्यासः व्याख्याकारेण प्रदर्श्यते । तदिदं नव्यनैयायिकप्रवरेषु कस्य वा मतमिति गवेषणकुशलैरनुसन्धातव्यमित्येतावन्मात्रमुच्यते ।

एवं लक्षणपरिष्कारे विभागप्रदर्शने वैयञ्जनिकादिशाब्दबोधनिरूपणे च नूतनां काञ्चित् पद्धतिमाविषृतवन्तो नव्यनैयायिका एव साहित्यशास्त्रस्यापि शास्त्रान्तरवदभ्यर्हितां पदवीं सम्पादितवन्त इति प्रथमे हि विद्वांसो वैयाकरणा इतिवत् द्वितीये हि विद्वांसो नैयायिका इत्यप्यालङ्कारिकैः वक्तुं शक्यते । एवं स्थिते कर्कशतर्कविचारव्यग्रः किं वेत्ति काव्यहृदयानि इत्यादि निर्विचारमभिदधतां शालीनबुद्धीनां पुरतः जरन्नैयायिकानां जयन्तभट्टानां याश्चैता निर्विवादसिद्धकर्तृकाः कालिदासरचनाः चमत्कारिण्यस्तासामान्योन्यसदृशं रूपमुपलभ्यत एव । अमृतेनेव संसिक्ताश्चन्दनेन चर्चिताः । चन्द्रांशुभिरिवोद्भुष्टाः कालिदासस्य सूक्तयः । । प्रकटरसानुगुणविकटाक्षररचनाचमत्कारितसकलकविकुला बाणस्य वाचः, प्रतिकाव्यं च तानि वैचित्र्याणि दृश्यन्ते एव । (न्यायमञ्जरी, भा. १, पु. ३३२.) इत्येतावन्मात्रमभिधाय लेखनव्यापारादस्मात् विरम्यते ।

6 कतिपयपरामृष्टग्रन्थसूची

1. जगन्नाथपण्डितः, रसगङ्गाधरः (रसचन्द्रिकासहिता)
2. विश्वेश्वरपण्डितः, अलङ्कारकौस्तुभः व्याख्यासहितः चौखम्बा संस्कृतसीरीस् ओफिस्
3. विश्वेश्वरपण्डितः, रसमञ्जरीसमञ्जसा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९८२
4. गोकुलनाथोपाध्यायः, काव्यप्रकाशविवरणम्, वाराणसेयसंकृतविश्वविद्यालयः पृ. १९८२
5. जयन्तभट्टः, न्यायमञ्जरी ग्रन्थिभङ्गव्याख्यया सहितः, सम्पूर्णानन्दसंस्कृतविश्वालयः, १९८२
6. मम्मटभट्टः, काव्यप्रकाश (सङ्केतबालचित्तानुरञ्जिन्यादिषोडशव्याख्यया समलङ्कृतः) नाग प्रकाशक, दिल्ली, १९९५
7. S. K. De, History of Sanskrit Poetics, Motilal Banarsidass, Delhi
8. Dineshchandra Bhattacharya, History of Navyanyāya in Mithila, 1987

[6](काव्यप्रकाशः, भागः- २, पृ. ६१४.)